# Vishnu Stavah

# વિષ્ણુસ્તવઃ

## Document Information

Text title : VishnustavaH by Varaha

File name : viShNustavaHvarAha.itx

Category : vishhnu

Location : doc_vishhnu

Author : Traditional

Transliterated by : D.K.M. Kartha

Proofread by : PSA Easwaran

Description-comments : Varahapurana adhyAya 11 verses 10-22. It is supposed to be gauramukhakRita mentioned in the index

Latest update : March 27, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 28, 2021

*sanskritdocuments.org*

# Vishnu Stavah

# વિષ્ણુસ્તવઃ

ગૌરમુખકૃતઃ
ધરણ્યુવાચ ।
કથં ગૌરમુખો વિષ્ણું તોષયામાસ ભૂધર ।
એતન્મે કૌતુકં શ્રોતું સમ્યગિચ્છા પ્રવર્ત્તતે ॥ ૧॥

વરાહ ઉવાચ ।
નમોઽસ્તુ વિષ્ણવે નિત્યં નમસ્તે પીતવાસસે ।
નમસ્તે ચાદ્યરૂપાય નમસ્તે જલરૂપિણે ॥ ૨॥

નમસ્તે સર્વસંસ્થાય નમસ્તે જલશાયિને ।
નમસ્તે ક્ષિતિરૂપાય નમસ્તે તૈજસાત્મને ॥ ૩॥

નમસ્તે વાયુરૂપાય નમસ્તે વ્યોમરૂપિણે ।
ત્વં દેવઃ સર્વભૂતાનાં પ્રભુસ્ત્વમસિ હૃચ્છયઃ ॥ ૪॥

ત્વમોઙ્કારો વષટ્કારઃ સર્વત્રૈવ ચ સંસ્થિતઃ ।
ત્વમાદિઃ સર્વદેવાનાં તવ ચાદિર્ન વિદ્યતે ॥ ૫॥

ત્વં ભૂસ્ત્વં ચ ભુવો દેવ ત્વં જનસ્ત્વં મહઃ સ્મૃતઃ ।
ત્વં તપસ્ત્વં ચ સત્યં ચ ત્વયિ દેવ ચરાચરમ્ ॥ ૬॥

ત્વત્તો ભૂતમિદં વિશ્વં ત્વદુદ્ભૂતા ઋગાદયઃ ।
ત્વત્તઃ શાસ્ત્રાણિ જાતાનિ ત્વત્તો યજ્ઞાઃ પ્રતિષ્ઠિતાઃ ॥ ૭॥

ત્વત્તો વૃક્ષા વીરુધશ્ચ ત્વત્તઃ સર્વા વનૌષધીઃ ।
પશવઃ પક્ષિણઃ સર્પાસ્ત્વત્ત એવ જનાર્દન ॥ ૮॥

મમાપિ દેવદેવેશ રાજા દુર્જયસંજ્ઞિતઃ ।
આગતોઽભ્યાગતસ્તસ્ય આતિથ્યં કર્ત્તુમુત્સહે ॥ ૯॥

તસ્ય મે નિર્ધનસ્યાદ્ય દેવદેવ જગત્પતે ।

ભક્તિનમ્રસ્ય દેવેશ કુરુષ્વાન્નાદ્યસઞ્ચયમ્ ॥ ૧૦॥

યં યં સ્પૃશામિ હસ્તેન યં યં પશ્યામિ ચક્ષુષા ।
વૃક્ષં વા તૃણકન્દં વા તત્તદન્નં ચતુર્વિધમ્ ॥ ૧૧॥

તથા ત્વન્યતમં વાઽપિ યદ્ધ્યાતં મનસા મયા ।
તત્ સર્વં સિદ્ધ્યતાં મહ્યં નમસ્તે પરમેશ્વર ॥ ૧૨॥

ઇતિ સ્તુત્યા તુ દેવેશસ્તુતોષ જગતાં પતિઃ ।
મુનેસ્તસ્ય સ્વકં રૂપં દર્શયામાસ કેશવઃ ॥ ૧૩॥

ઇતિ વરાહપુરાણે એકાદશોઽધ્યાયાન્તર્ગતઃ વરાહપ્રોક્તઃ વિષ્ણુસ્તવઃ સમાપ્તઃ ।
ગૌરમુખકૃતઃ

અધ્યાય ૧૧ શ્લોકાઃ ૧૦-૨૨

Encoded by D.K.M. Kartha and proofread by P.S.A. Easwaran

---

*Vishnu Stavah*

pdf was typeset on March 28, 2021

Please send corrections to *sanskrit@cheerful.com*